
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

M-2701

शिर्षक	ग्रंथकार	विषय	विस्तार (पुर्ण/ अपूर्ण)	टिकाकार	आकार	पृष्ठे	लिपी	सामग्री	Lines per page	Letters per line	Condition & age (शके/विक्रम सवंत)	Additional Particulars / Remark
पंचरत्न	त्र्यंबक भट्ट	वेदांग	पूर्ण		3/9	110	संस्कृत	कागद	10	23	शके 1690	

नविनष्टेप्यज्ञानेकारणेकेंचित्कालंतत्कार्यसत्त्वांगीकारेणसंचितक्रियमाण
योर्ज्ञानविदग्धत्वेनशेषप्रारब्धस्यजीवन्मुक्तिदशायांभोगप्रदानेनविनाशस्तद्वि
नाशेचविदेहकैवल्यमितिक्रमतःप्रदर्श्यतेतत्र॥प्राक्कर्मप्रविलाप्यतांचितिबला
दितिसर्वत्रप्रसज्जतेचितिर्ज्ञप्तिस्वरूपआत्मातद्बलात्तदात्मावबोधदार्ढ्यात्
सवासनाक्षयसमनोनाशभेदनिवृत्तिफलाद्ब्रह्मात्मसाक्षात्कारादित्यर्थः।प्रा
क्कर्मानिकजन्मकृतपुण्यापुण्यरूपमनारब्धफलंसंचितंकर्मप्रविलाप्यतां
प्रकर्षेणात्माबाधित्वेनावस्तुत्वदर्शनेनप्रबोधेस्वप्नवद्विलयंनीयतामत्रप्रविला
प्यतामितिप्रेरणाभासेनजीवन्मुक्तिस्थितिरनुद्यतेनतूपदेशःस्वात्मज्ञानसि
द्धत्वात्तदध्यस्तसकर्मकदेहादिनिवृत्तेःतथाचश्रुतिः।भिद्यतेहृदयग्रंथिःछि
द्यंतेसर्वसंशयाः।क्षीयंतेचास्यकर्माणितस्मिन्दृष्टेपरावरइति।भगवतापि

यथैधांसि समिद्धोग्निर्भस्मसात्कुरुते तथेति एतेन ज्ञानिनोऽनारब्धकर्मसंबंधो
ऽपास्तोऽथ क्रियमाणसंबंधोप्यपास्यते नाप्युत्तरैः श्लिष्यतामिति उत्तरैः क्रियमा
णैर्ज्ञानादूर्ध्वं यावद्देहपतनं लोकसंग्रहपरिपालनैः शौचाद्याचारैः स्वाभाविकैर्वि
हारैश्च न श्लिष्यतां न संबध्यतां चित्तिबलादिति पूर्वेणैवान्वयः ब्रह्मात्मनिष्ठाब
लान्न सज्ज्यतां नाहं कर्त्ता न मम कर्माणि देहादीनि चेति यावत् अपिशब्दश्च
कारार्थो यथाऽनारब्धानि ज्ञानविदग्धानि तथा क्रियमाणान्यसंबद्धानि चेति।
किंच यः क्रियमाणे कर्मणि सज्जमानः सोऽनारब्धफलभागपीति विज्ञेयमे
कनीडत्वादुभययोर्विदग्धे नीडे न कान्यपि तिष्ठंतीति॥ तथापि लोकदृष्टिमनु
सृत्य प्रारब्धभोगानुकूल्याय प्रातीयमानेपि क्रियमाणेन तत्संबंधः स्यानूज्ञा
निन इति। तथा च कर्मण्यकर्म यः पश्येदकर्मणि च कर्म यः॥ स बुद्धिमान्मनु

ब्येषु स युक्तः कृत्स्नकर्मकृत्॥ यस्य सर्वे समारंभाः कामसंकल्पवर्जिताः॥ ज्ञा
नाग्निदग्धकर्माणं तमाहुः पंडितं बुधाः॥ त्यक्त्वा कर्मफलासंगं नित्यतृप्तो निरा
श्रयः॥ कर्मण्यभिप्रवृत्तोऽपि नैव किंचित्करोति स इत्यादिना भगवतापि ज्ञानि
नः कर्मसंबंधोऽपास्तः ननु ज्ञानिनोऽपि दृश्यत एव कर्मसंबंधः कथं तस्यापला
पः स्यात्। तत्फलसुखदुःखादिभोगानां दर्शनात्। तत्सत्त्वेऽनिर्मोक्षोऽपीति चे
न्नायं दोषस्तज्ज्ञभोगानां प्रारब्धैकफलत्वात्। प्रारब्धानां तु भोगादेव क्षयादित्या
ह। प्रारब्धं त्विह भुज्यतामिति। प्रागस्माद्देहाद्भोगायानीतानंतरदेहांतःप्रार
ब्धं प्रवृत्तमित्यर्थः॥ तु विलक्षणत्वद्योतनार्थः संचितक्रियमाणयोर्विलक्षण
मिति॥ इह व्यवहारे यावदयं जीवन्मुक्तस्य देहस्तद्भोगसमाप्त्या व्यक्ततां या
ति तावद्भुज्यतां भोक्तव्यं नदप्राप्तावाकांक्षा लाभे च हर्ष इत्यादिविरहेण केवलं त

त्तेस्तत्यस्यसाक्षित्वेनभोगेनैवसमाप्यतामितियावत्।चितिबलादितिपूर्वेणान्वयः
तस्माद्यद्यपिब्रह्मात्मैक्यविद्ययाऽनादितःसकार्याविद्यानिवृत्तौतज्ज्ञानिनःकि
मभिभोक्तव्यंनवाकश्चित्कर्त्तव्यार्थोस्ति।तथापिप्रातिभासिकीसत्तामनुसृत्य
ज्ञानादूर्ध्वंकंचित्कालंतद्देहमत्वाभ्युपगमात्।सर्वपुण्यापुण्यक्षयेप्यनारब्ध
स्यैवाशेषतःक्षयोऽभ्युपेयतेऽतःक्रियमाणप्रारब्धयोर्बाधितानुवृत्तिशरण
तयायावद्देहपतनमश्लेषभोगाभ्यांजीवन्मुक्तिर्दर्शितानचज्ञानाग्निःसर्व
कर्माणिभस्मात्कुरुतेऽर्जुनेत्यादिनासर्वकर्मदाहस्योक्तेसतिभगवतानक
स्यचिदपिकर्मणःफलभोगःस्याज्ज्ञानिनइतिवाच्यमत्रसर्वपदस्यपुण्यापु
ण्यविषयत्वात्सर्वाणिप्रारब्धेतराणिपुण्यापुण्यानीति।तस्मात्प्रारब्धकर्मण
स्तत्फलभोगादेवक्षयःसंगच्छतेनतुज्ञानात्तद्भोगस्यप्रतीयमानत्वात्स्मृति

रपितस्यतादेवचिरंयावन्नामोक्ष्येऽथसंपत्स्यइतितस्माद्यद्यपिगुरुशास्त्रज
वृत्त्यासर्वाज्ञाननिवृत्तौसर्वाज्ञानकार्यस्यसकारणस्यतस्यानिर्वचनीयत्वान्न
प्रमात्रवेद्योविनाशउपपद्यतेसवितरिध्वांतविनाशवत्तथापिज्ञानीतरदृष्ट्या
सत्तारतम्यंसर्वंवर्त्ततएवतदंतःपातित्वेनज्ञानिनःप्रारब्धक्षपणमप्यवस्तु
त्वेनैवलोकदृष्ट्यास्तु।नन्वेवंतर्ह्यनारब्धान्यपिलोकदृष्ट्यैवसंतुतत्फलभो
गायज्ञानिनःपूर्वदेहोप्यस्त्वीतिचेन्नारब्धानारब्धयोःपरिणतापरिणतत्वेन
विशेषापादनात्।लोकदृष्टेश्चनिरंकुशत्वादप्रमाणजत्वाद्दिष्टापत्तिरेवास्त्व
नारब्धान्यपिलोकदृष्ट्यैवसंत्विति।तस्माद्यद्यपिपरमार्थतःसर्वस्यचैतन्या
र्थत्वेनचैतन्यमात्रत्वान्नप्रमाणजाज्ञानादूर्ध्वंप्रारब्धग्रहणमपीष्टंतथापि
बंधमोक्षादिव्यवस्थाव्यवहारमनुसृत्यानेकश्रुतिस्मृतिप्रतिपादितज्ञी

वन्मुक्तस्यस्थितिमात्रसंरक्षणेनप्रारब्धैकभोगक्षपणंनविरुद्धंभवति॥सूत्र
कारोपिभोगेनत्वितरेक्षपयित्वासंपद्यतइति॥ननुप्रारब्धस्यानिवार्यत्वान्न
स्थितिसंरक्षणमात्रमितिनियमस्यात्तुयथेष्टाचरणमेवास्तुनजीवन्मुक्तःक
स्यचिन्नियमस्यादितिचेत्सत्यंतथापियथेष्टाचारस्यभूमिकाभेदेनकादा
चित्कत्वान्नानियमःसंगच्छतेर्थान्नियमएवास्तुजीवन्मुक्तौहर्षशोकादिगु
णविरहस्यश्रुतिस्मृत्यनुवर्णितत्वात्॥तत्रज्ञानसमकालएवयेषांप्रारब्ध
स्यक्षयःस्यात्तेषुनकश्चिद्भूमिकाविशेषोऽन्योवास्तियेषांचासमकालेप्रा
रब्धक्षयस्तेषांयद्यपिबाधितानुवृत्तित्वेनकश्चिद्विशेषोस्तितथापिव्यवहारे
प्रारब्धप्रवाहतोयेकेचिन्पूर्वाभ्यासबलाद्बाधितानुवृत्त्यानिर्विकल्पंसमाध
यस्तेषांसएवाचारस्तत्रापिनकश्चिद्विशेषोस्तितथाचप्रजहातियदाकामान्

सर्वान्पार्थ मनोगतान्॥ आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यत इति भगवता
समाधेर्लक्षणमुक्तं भवत्यत्र कामान्। घटपटादिवासनादिना तस्माद्ये समाधिनि
ष्ठास्ते सर्वतारतम्यापरमेणानास्वादितबाधितानुवृत्तयस्तिष्ठंति। केचित्तु व्युत्थि
तसमाधयस्तेषु भूमिकाविशेषेण बाधितानुवृत्तिशरणतया तारतम्यं श्रूयते। त
त्र केचिद्व्यक्तलिंगा वर्णाश्रमादिपरामर्शिनस्ते याज्ञवल्क्यजनकादिवच्छास्त्री
येणैव देहस्थितिसंरक्षणं स्ववर्णाश्रमाचारप्रवाहेण लोकसंग्रहप्रतिपालनं
च कुर्वंति। ये च केचिदव्यक्तलिंगास्ते यथा परमहंसानां मध्ये संवर्त्तकारुणिश्वेत
केतुदुर्वासोऋभुनिदाघजडभरतदत्तात्रेयरैकप्रभृतयोऽव्यक्तलिंगा अव्यक्ता
चारा अनुन्मत्ता उन्मत्तवद्विचरंतीति तद्वद्विचरंतु ते च पूर्वमुत्कृष्टतपःसामर्थ्यात्
प्राप्ताचिंत्यशक्तयः प्रारब्धमप्यतिकर्त्तुं समर्था देहाद्यनत्परत्वेन सर्वत्राभिलाष

शून्याजितस्तुत्स्तद्विकालाअलौकिकाचारेणचरंतितेषामाचारस्तुनान्यैःसेव्योस्य
लोयेस्वभूमिमतिक्रम्यविचरंतितेऽज्ञाःछद्मचारिणश्चेतिविज्ञेयं।ननुविनष्टेऽज्ञाने
पुनस्तत्कार्यतःशेषग्रहणंविरुद्धंस्यादनिर्मोक्षोपि।अथजीवन्मुक्तिव्यवहारस्य
प्रतीयमानत्वमयाद्बाधितानुवृत्त्यातस्यकार्यतोग्रहणेनगतिःक्रियतेतत्रस्थि
तिविनाशयोर्युगपत्सत्त्वेविरोधःस्यात्सांशत्वंवाऽज्ञानस्यातोनज्ञानादूर्ध्वंतत्का
र्यतद्वाऽवशिष्टमभ्युपेयंकिंत्वनादितोज्ञानासत्त्वपरिज्ञानेनज्ञानिनःसर्वंब्रह्मै
वतेनैवसर्वंक्रियतेतस्यचयत्किंचिल्लवृत्तंशुभमशुभंवातत्सर्वंब्रह्मैवकिमज्ञा
नशेषेणतत्कार्यशेषेणवेतिचेत्सत्यं।तथापीहलोकदृष्टिशरणतयाप्रतीयमा
नविरुद्धार्थाक्षेपपरिहारेनकिमपिविरुद्धंभवति॥अघटितघटनायानिरंकु
शत्वान्नतथादेशकालाद्यनवच्छिन्नमसंसार्यपिचैतन्यंयदज्ञानानुग्राहक

त्वेन संसारी च विलसति तथा तद्द्वारैव तन्निवृत्त्यनंतरं जीवन्मुक्तिव्यवहारानुरो
धेन कंचित्कालं तस्य सत्वमपि बाधितानुवृत्त्यानेकश्रुतिस्मृतिप्रतिपाद्यं तदभ्यु
पेयते। परमार्थतस्तत्सत्वनिवृत्त्योरुभययोरपार्थत्वेपि। तथा हीह वेदांतसमये
व्यवहारसिद्ध्यै चैतन्याश्रयविषयमनाद्यनिर्वचनीयमावरणविक्षेपशक्ति
द्वयात्मकं साक्षिवेद्यमज्ञानमभ्युयते। तत्र सुषुप्तिं लक्षयेत्साधारणं तदावर
णात्मकं। जाग्रत्स्वप्नेतस्य वाहंकाराकारेण विशेषरूपेण भाति तद्विक्षेपरूपं
यतः स्वचिदाभासेनाकाशादिचतुर्दशभुवनात्मकोहमनादिप्रत्ययसिद्धः प्र
पंचः प्रमातृप्रमाणप्रमेयरूपेण साक्षिवेद्यः प्रतिपद्यते यत्तादात्म्यऽतयासंसा
र्यपि चैतन्यं संसरति तत्तादात्म्यं चाहंकाराकारेण त्रिविधं सहजं कर्मजं भ्रांति
जमिति। तत्र चिदाभासेन सहाहं सुखी दुःखीत्यादिप्रत्ययरूपेणानेकवास

नारूपं सहजं साक्षितादात्म्यं सिद्धं।यच्च तद्भोगायतनवासनापरिणतकर्मज
देहेन सहाहंकृशः स्थूलोहमित्यादिप्रत्ययरूपं तत्कर्मजं यत्साक्षिणा सह स्थूल
सूक्ष्मप्रत्ययाविशिष्टं केवलमहमिति परिच्छिन्नात्मानुभवरूपं तद्भ्रांतिजमज्ञान
जमित्यर्थः।अत्र च यत्सहजं तद्दर्शात्सूक्ष्मदेहावलंबनप्रातिभासिकजीवोपा
धिसिद्धमिति विज्ञेयं।यच्च कर्मजं तत्प्रसिद्धं स्थूलोपाध्यवलंबनं व्यावहारिकंजी
वोपाधिसिद्धमिति।चायच्च भ्रांतिजं तद्दर्शात्कारणोपाध्यवलंबनं पारमार्थिक
जीवोपाधिसिद्धं।एवं तादात्म्यत्रयेण संसार्यपि चेतन्यं संसरतीत्यध्यारोपः।
अथैतस्याध्यारोपस्यापवादोपि तादात्म्यत्रयविनाशेनैव व्यवहारतः सिध्य
ति।तत्र भ्रांतिजस्य गुरुशास्त्रजन्यत्युत्पत्तिमात्रेण नान्येन सर्वोपरमेण समा
ध्यादिना वा।सहजस्य तु सहज एवं भ्रमनाशान्नाशः प्रतिपद्यते न तत्र पृथक्

साधनापेक्षा। शास्त्रं तत्राभिमतं। कर्मजस्य च प्रारब्धकर्मपरिणतत्वात्तत्फल
भोगेन प्रारब्धक्षयादेव क्षयः संगच्छते न तु तद्गुरुशास्त्रजविद्याविरोधि भवति त
त्सहचारित्वाज्ञानोपत्तेरतो ज्ञानादूर्ध्वमपि तस्य सत्त्वं प्रतीयते तदनुगतत्वेन बा
धितानुवृत्त्याऽज्ञानमपि साभासं तेन च स्थूलानुरोधेन बाधितानुवृत्त्याहं सु
खीत्यादिप्रत्ययरूपेण सूक्ष्मशरीरानुगतत्वेन सहजमपि प्रत्यक्षतः प्रतीय
मानत्वात् न तथा भ्रांतिजे ज्ञानिनः परिछिन्नात्मस्फूर्तेरसंभवात्। ब्रह्मास्मी
ति बोधस्याप्रतिहतत्वात् एवं कार्यानुरोधेन कारणस्य बाधितानुवृत्त्यास
त्वेऽभिप्रेते न कश्चिद्विरोधः उन्मुलितेपि वृक्षे सार्द्रादिरूपेण कंचित्कालं कार
णसत्त्वस्य दर्शनात्। एवमनेन स्थितिविनाशयुगपद्विरोधोप्यपास्तः सांश
त्वदोषोपि तद्विनाशे ज्ञानांतरस्यानपेक्षत्वात्। स्वरूपतोऽनिर्वचनीयत्वाच्चा

तोबाधितानुवृत्याज्ञानादूर्ध्वमज्ञानसत्वेऽभिप्रेतेपिनसांशत्वमभ्युपेय
मस्तुतथाभूतेदग्धवस्त्रावभासवत्तुकिंचित्कालंव्यवहारस्यप्रतीयमानत्वा
त्। अथज्ञानिनः सर्वंब्रह्मैवतेनब्रह्मणैवसर्वंक्रियतइतियदुक्तंतत्रसमाधा
नं। सर्वंब्रह्मेत्यत्रश्रुत्याब्रह्मणोदेशकालाद्यनवच्छिन्नत्वात्। अखंडाद्वितीय
त्वमध्यवस्यते। ननुप्रमेयप्रमात्रादिव्यवहारोऽनस्तदाकारेणसतानकेना
पिकिमपिकर्तुंशक्यतेकूटस्थस्वरूपत्वाद्ब्रह्मणोऽतोजीवन्मुक्तिव्यवहार
स्यप्रतीयमानेसत्यज्ञानस्यबाधितानुवृत्यासत्वग्रहणंनविरुद्धंब्रह्मणः
सर्वांतर्यामित्वसर्वेश्वरत्वसर्वकर्तृत्वादिविशेषणानितुतदन्यथात्वाध्या
ससिद्धौतत्सत्वाभिव्यंजकत्वेनश्रुतिभिःप्रोक्तानिसंति। ननुनिःकर्षतोध्या
यतीवलेलायतीवेत्यादिश्रुत्येवशब्देनजानातिकरोतीत्यादिधर्माणामाभा

सत्वप्रतिपादनात् अन्यत्रधर्मादन्यत्राधर्मादित्यादिश्रुत्यंतरादपितस्मात्ज्ञाना
दूर्ध्वंज्ञानिनोनकिंचिद्ज्ञानोपादानमभ्युपेयंसविशेषंसर्वात्मदर्शनंवास्यप्रादु
स्थितस्यस्वाप्नाभासवत् अनाद्यज्ञानासत्वापादनेप्यज्ञानस्यसकार्यत्वाभि
प्रेतत्वेनायमेवसिद्धांतस्तथाचतत्वमस्यादिवाक्योत्थसम्यक्धीजन्ममात्र
तःअविद्यासहकार्येणनासीदस्तिभविष्यत्यनेनापिसर्वदैवनिःक्रियंनि
र्विशेषंब्रह्मात्मस्वरूपंप्रतिपादितंभवतिप्रतीयमानस्यसविशेषस्यबुद्धेरन्य
त्रासिद्धत्वादज्ञानस्यचानिर्वचनीयत्वस्वभावेनचिन्मात्रत्वानतिक्रमात्स
त्यप्येवंलोकदृष्ट्याज्ञानादूर्ध्वंकंचित्कालंप्रारब्धक्षपणार्थंज्ञानिदेहेप्रतीयमा
नबाधितानुवृत्याज्ञानग्रहणेनकिंचिद्विरुद्धंस्यादुक्तश्रुतियुक्तिबलात्॥
तत्रचनातिप्रसंगोऽभ्युपेयस्तेनसर्वंशुभमशुभंवायत्किंचित्क्रियतेतद्ब्रह्मैव

तिमिरस्ताशेषानर्थत्वात्प्राप्ताशेषपुमर्थत्वात्सर्वतःसंप्लुतोदकस्थानीयत्वा
त्तस्य तथा चन्ज्ञानामृतेन तृप्तस्य कृतकृत्यस्य योगिनः। नैवास्ति किंचित्कर्त
व्यमस्ति चेन्न स तत्त्वविदिति भगवतापि यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मान
वः। आत्मन्येव च संतुष्टस्तस्य कार्यं न विद्यत इति। अन्यत्रापि बुद्धाद्वैतसत्त्व
स्य यथेष्टाचरणं यदि। शुनां तत्त्वविदां चैव को भेदः शुचिभक्षण इति। तस्माज्जी
वन्मुक्तः पुमान् बाधितानुवृत्त्यापि सर्वत्राभिलाषशून्यत्वेन केवलं प्रारब्धक्ष
पणेन देहस्थितिमात्रेण लोकसंग्रहपरिपालनेन च क्रियमाणाश्लेषेण विचर
तु न तत्रातिप्रसंगः प्रसज्जेत पूर्वतनःसाधनप्रवाहेण विधूतासत्संस्कारत्वात्
गुरुशास्त्रजन्यविद्यासहचारितत्वात्तस्याचरितस्य। ननु कर्मण्यकर्म यः पश्ये
दित्यादिना भगवदुक्तेन तस्य सर्वस्य क्रियमाणस्याकर्मत्वप्रतिपादनेन ते

नाविरोधे नैव सर्वक्रिये तत्तस्य रागादिनाप्यरागादित्वं स्यात् प्रारब्धस्यापि
प्यनियतत्वेनानिवार्यत्वान्न तस्य कस्मिंश्चिदपि कर्मणि विधिप्रतिषेधशंकास्या
दिति चेत्सत्यं॥ तथापि भगवतैव वीतरागभयक्रोधादिनाऽद्वेष्टा सर्वभूताना
मित्यादिना शारीरं केवलं कर्मेत्यादिना यस्य सर्वे समारंभाः कामसंकल्पव
र्जिता इत्यादिना चातिप्रसंगोऽपास्तस्तस्मात् भगवदेकशरणस्यात्मारामस्य
त्यक्तैषणस्य ज्ञानिनोऽनाविद्वद्वद्यथेष्टाचरणं संभवति॥ किंतु जीवननिर्वाहकप्र
वाहतोऽधिकृतेन लोकसंग्रहपरिपालनेन विधिप्राप्तं वालेन क्रियते नान्यत्॥
तथा च। दोषबुद्ध्योभयातीतो निषेधान्न निवर्त्तते॥ गुणबुद्ध्या च विहितं न करो
ति यथार्भकः॥ इति भागवतेऽस्यायमभिप्रायः उभयातीतो विनिर्मुक्तविधिप्र
तिषेधोऽकिंचित्करः पुमान् विद्वत्संन्यासि प्रमादतः प्राप्तात्प्रतिषिद्धात्कर्म

णोनिवर्त्तत एव न तु दोषबुध्या तथा च प्रवाहतः प्राप्तं यद्विहितं तत्कारोत्येव न तु गुण
बुध्या ममेदं समीचिनाचरणमिति नानुसंधत्ते यथाऽर्भकोऽनुसंधानरहितस्तद्वदिति
॥ तस्मात्तत्वविदा प्रारब्धैकभोगः क्षिप्यते तत्सहचारित्वे न च यदि क्रियते न तत्सानु
संधानमभ्युपेयं प्रवाहतः प्राप्तमेव सानुसंधाने विकारित्वं स्याद्विकारित्वे च बाधिता
नुवृत्तिलक्षणं हीयेत ॥ दृश्यते च यत्र कुत्रचित्सानुसंधानं वृत्तं तत्तावन्मात्रजीवन
हेतौ लोकसंग्रहपरिपालन एव न तु पभोगादौ प्रतिषेधे या भगवतापि सक्ताः कर्म
ण्यविद्वांसो यथा कुर्वंति भारत ॥ कुर्याद्विद्वांस्तथासक्तश्चिकीर्षुर्लोकसंग्रह परिपा
लनानन्यत्रानादरो दर्शितस्तस्मान्न जीवन्मुक्तस्य यथेष्टाचरणमभ्युपेयं कदाचि
त्कुत्रचिच्चेत्प्रवृत्तं तन्निरनुसंधानमभ्युपेयं तेजीयसामीश्वरेण परमयोगिना दत्तात्रेया
दीनां वायः कश्चिदाचारः स तु नान्यत्र प्रसज्जेत । कर्मण्यकर्मदर्शित्वं तु भूमिका

भेदेन च यस्य यस्मिन् कर्मणि प्रसक्तिस्तस्य तस्मिन् कर्मण्ये ।ऽभ्युपेयं नान्यस्या
न्याचारे ॥ किं च जीवन्मुक्तिविदेहकैवल्यस्यानारब्धकर्मक्षयस्य चार्थाल्लिंगं विज्ञे
यं यः कश्चिदुपभोगपरायणो रागादिमान् स तु संसार्येव न तस्य प्राक्कर्मक्षयोऽपुनरा
वृत्तिर्वाभिप्रेता स्मिये च सर्वं ब्रह्मेति वाक्यार्थानभिज्ञा अनिवृत्ताविद्या अपि ज्ञानि
मानिनः सविशेषं सर्वं ब्रह्मेति मत्वा तारतम्यज्ञा अपि यथेष्टं चरंति ते त्वत्तीव मंदा
स्तथा च कुशला ब्रह्मवार्त्तायां वृत्तिहीनाः सुरागिणः ते ऽप्यज्ञानतमा नूनं पुनरायां
ति यांति वै ॥ इत्यपरोक्षानुभूतावत्र वृत्तिशब्देन ब्रह्मास्थितिर्विज्ञेया यथा तिष्ठंति ब्र
ह्माद्या इत्यनंतरा द्विशेषणात् अतो लोकदृष्ट्यापि ज्ञानिनोऽरागिणः संतः प्र वा
हपतउक्ताचारेणैव तिष्ठंति न तेषां कुत्राप्यादरः स्यादिति प्रारब्धं हि हृद्भुज्यतामि
त्येतेन जीवन्मुक्तिर्विवृताऽथ परं ब्रह्मात्मनास्थियतामिति विदेहकैवल्यं दर्शय

त्यधिकृतस्य तत्त्वार्थविदोऽथ प्रारब्धक्षयानंतरं प्रारब्धक्षयांत इति यावत् परं केव
लं बाधितानुवृत्तिविरहेण निर्विशिष्टेन ब्रह्मस्वरूपेण स्थीयतामिति संभावनया जी
वन्मुक्तस्यापुनरावृत्तिं लोकदृष्टिमनुसृत्य स्तौति तद्दृष्ट्या तु तस्य तज्ज्ञावित शास्त्रा
चार्यप्रसादजया वृत्त्या सर्वदैव विदेहकैवल्यं कुतस्तत्प्राप्तिर्वर्त्तमानदेहयोगो वा
कुतस्तस्यांतः किंच जीवन्मुक्तश्चेत्परमार्थतः स्वदेहपतनं पश्यति तदा तस्य ना
विद्यानिवृत्तिरनारब्धकर्मविनाशो वा ना पुनर्भवो वा तस्मात्कालत्रयेपि नासा
वात्मान्यत् किमपि पश्यति किंतु कैवल्यस्वरूपः सन् कैवल्यं याति ब्रह्मैव सन्
ब्रह्माप्येतीति श्रुतेः ॥ अन्यत्रापि ॥ कृपणधीः परिणाममुदीक्षते क्षपितकल्मष
धीस्तु विवर्त्ततः ॥ स्थिरमतिः पुरुषः पुनरीक्षते व्यपगतऽद्वितयं परमं पदमित्य
नेन मूढविवेकिप्राज्ञा इति त्रिविधोपि जन आत्मानमनुभवति इत्यनूद्यते तत्रमू

दः संसृतिकारणं देहादिरूपेण विवेकी मुमुक्षुर्विवर्त्ततो रज्ज्वादौ भुजंगादिवत्भ्र
माधिष्ठानं॥ अथ प्राप्तः स्थिरमतिरद्वितीयं ब्रह्म परमं पदं निरस्ताविद्यमनन्यसि
द्धं न तदन्यभासत्तोपीक्ष्यत इत्यर्थः तस्मात्तत्त्वविदात्मान्यत् किंचिद्भिन्नमभिन्नं वान
पश्यति न च तस्य देहादित्याज्यं विदेहं कैवल्यं ग्राह्यं वा कैवल्यस्वरूपत्वात् तथा
चापरोक्षानुभूतौ न तत्त्वज्ञानोदयादूर्ध्वं प्रारब्धं नैव विद्यते॥ देहादिनामसत्त्वात्तु य
था स्वप्नप्रतिबोधत इति॥ तथापि लोकदृष्ट्याभिपद्यत एवात्तस्य तावदेव चिरं
यावन्न मोक्षेऽथ संपत्स्य इति श्रुतेश्च॥ त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जु
न इति भगवद्वचनाच्चान्यत्रापि जीवन्मुक्तिपदं त्यक्त्वा स्वदेहे कालसात्कृते वि
शत्यदेहकैवल्यं पवनोऽस्पंदतामिवेति॥ वाक्यवृत्तौ च प्रारब्धकर्मवेगेन जी
वन्मुक्तोऽथवा भवेत् किंचित्कालमनारब्धकर्मबंधस्य संक्षये॥ निरस्तातिश

यानंदवैह्लवंपरमंपदं॥पुनरावृत्तिरहितंकैवल्यंप्रतिपद्यतइति॥एवंतत्वज्ञा
नादूर्ध्वमसंगतमपिकर्मशेषंगृह्यतेश्रुतिस्मृतिभिःतथाचापरोक्षानुभूतौ॥
देहस्यापिप्रपंचत्वात्प्रारब्धावस्थितिःकुतः।अज्ञानजनबोधार्थंप्रारब्धंवक्ति
वैश्रुतिरितिअत्रप्रारब्धैकभोगक्षपणसूचनयानातिप्रसंगइतिविज्ञेयंमनेनै
वाभिप्रायेणेहविदेहकैवल्यालिंगभूतांजीवन्मुक्तिंदर्शयित्वात्यक्तसर्वैषण
स्यस्वरूपतोऽर्थतोवासंन्यासिनःसंत्यक्तसर्वजात्याद्यभिमानस्यभगवदेक
शरणस्यविदितात्मतत्वस्यनापुनर्भवशंकेतिदर्शितं।एवमिहखलुजननम
रणार्णवमग्नानांमध्येकेचित्तितीर्षवोनिश्रेयसार्थिनस्तेषामुद्धरणार्थंकोड
त्रयात्मकोवेदःप्रवृत्तोपितत्प्रवेशासक्तानांप्रवेशायकृपाकलितेनचित्तेन
श्रीमद्भगवदाचार्यैःपूर्वापरश्रुतिसमन्वयेनप्रस्थानानिप्रणीतानि।तत्रा

प्रत्यंताशक्तानुदिश्य वेदो नित्यमधीयतामित्यारभ्याथपरब्रह्मात्मनास्थि
यतामित्यंतेन संक्षेपतः सर्ववेदार्थसंग्रहतः पंचरत्नानि प्रणीतानि संतितद्व्या
ख्याने ऽव्युत्पन्नेनापि मया श्रीमन्नित्यानंदानुचरेणकेवलमत्याप्रेरितेन मन
सेदं विवरणं कृतं यत्तत्प्रीयैतेस्तु ॥ संसारानलसंतापस्तत्रसार्थप्रचादिने ॥
गुरूणांगुरुरूपायनित्यानंदायतेनमः ॥ १ ॥ यद्भुमंगलवेन विश्वमखिलं सं
भातिसन्मात्रके यत्साक्षात्करणोपसंहृतमसत्कल्पत्वमापद्यते ॥ यत्पाद्यप्र
मवाद्यनाशनजलापुण्यध्वजास्वर्धुनीतेदेवंसकलाश्रयं सुरगुरुं चंदामहे
विठ्ठले ॥ २ ॥ ॥ इतिश्रीमन्नित्यानंदानुचरकृतपंचरत्नप्रकाशः समाप्तः ॥ ॥
॥ श्रीरामकृष्णा ॥ ॥ छ ॥ हेंपुस्तकत्र्यंबके[redacted] ० ॥ शके १६७०
सर्वधारीनांसंवछरेमार्गशीरषुद्ध पंचमीसोम्यवासरसमाप्तः ॥ छ ॥ छ ॥ छ ॥

रत्न ।

॥ इति पंचरत्नसमाप्तः ॥

॥ अथ अनुभवामृतपरिभाषाप्रारंभः ॥

पा°
१

श्रीगणेशायनमः॥ शब्दपर्यायनिरुपाधिक॥ उपाधिरहित॥ जन॰
केकारण॥ मुक्तिकेआद्ये॥ देवादेविशिवशक्ति॥ १॥ उलथे॥ होय॥ सरोभ॰
री॥ बरोबरी॥ चारुस्छलि॥ स्वरुपी॥ येकाहारी॥ येकरूप॥ २॥ पांगेनाहिपणे
उगव्हितेप्रगटहोणे॥ आहानिआहेत॥ ३॥ साकारेप्रत्यक्ष॥ ४॥ आव्हु
किभुकाव्हु॥ फुटोहूंत॥ ५॥ भेडेभेकाडे॥ ६॥ झोकढका॥ ७॥ बैसणेअसणे
लेणेमिरवणे॥ ८॥ भोगणयाभोगास्तव॥ थावोशोध॥ द्वैताचा॥ शिवश॰
क्तिचा॥ ९॥ एकोपजिवियेकजिवन॥ १०॥ मेळुऐक्य॥ उवायेउत्कर्ष॥ मांड

लिव्यापिलि ॥ ११ ॥ घरवातेकुशळ ॥ मोटकिनेटकी ॥ गोसावीस्वामि ॥ संज्ञेज्ञा
न ॥ रिगेपहुडे ॥ शक्तिशरीरिप्रवेशे ॥ दंपत्यपणेउभयपणे ॥ १३ ॥ येकाधेशि
व ॥ विपायेकदाचित ॥ उमगलेजागत ॥ होयनिंदसंगसांडि ॥ घरवातशि
वशक्तिपण ॥ १४ ॥ देहेहोन ॥ आटणिलोप ॥ गिवसीतग्रहण ॥ वाहनिप्र
वाहि ॥ आधाधिअधिअधि ॥ १५ ॥ विषोविषय ॥ विषयेविषयि ॥ १६ ॥ दांडि
काणि ॥ स्फतिश्रवण ॥ दनिसुगंध ॥ १८ ॥ आरोगणभोजन ॥ मेहुनशिवश
क्ति ॥ २० ॥ निवडुवेगळि ॥ २२ ॥ निवडुजाना भिन्नकरिता ॥ निवाडुविचार

र॥२४॥गाभाआश्रय॥२५॥द्योतकप्रकाशक॥अनुमापकनर्का॥यासयो
ग्य॥मिरवनशोभत॥२६॥निष्कर्युसेवट॥द्दादुलेनिपुरुषे॥सताविशेषुस्व
रुप॥२७॥थारोराहो॥२८॥संसाराव्यवहारा॥उभाराप्रपंचरचना॥२९॥दु
काळादुकळ॥सोहळासंभ्रम॥लीलाआवड॥३१॥उवायाउत्कर्षा॥स्वसं
कोचेस्वरुपलोपे॥३२॥स्रोभाआवेष॥३३॥भिडाप्रीत॥आंबुलाअलक्ष
आंगविलाहारपला॥३४॥मद्रूपेअसंगरूपे॥नेडेपडपेशक्तिसहवा
से॥३५॥चेववविलाजागाकेला॥व्येद्याचेविषयाचे॥बोनेजवन॥वाढिने

नसीशक्तिसहित ॥ जेउभोजनकरुन ॥ ३६ ॥ विसावलालोपहोना ॥ आयु
लेशिव ॥ ३७ ॥ होषेवाचुन ॥ ३८ ॥ अंगलगेसंगे ॥ आरोगुभोगु ॥ ३९ ॥ आंगस्व
रूप ॥ चांगशोभा ॥ जेविंनेजैसी ॥ ४० ॥ समीरवायु ॥ ४१ ॥ परिमळुसुगंधु ॥ अ
नळुअग्नि ॥ ४२ ॥ प्रणवाक्षरीसगुणरुप ॥ विरुढलिजालि ॥ प्रपंचरूपविस्ता
रलि ॥ ४४ ॥ भेदत्रिराभास ॥ उजिराउदय ॥ वोहरायेकरूपा ॥ ४५ ॥ रजनिरात्रदि
वस ॥ दिटीचदृष्टीमध्ये ॥ नाहिन ॥ ४६ ॥ घरवयिशीवशक्ति ॥ ४९ ॥ वाहनिप्रवा
हि ॥ वेदकुजाणता ॥ वेयाचेस्वरूपाचे ॥ ५० ॥ लिंगभेदुस्वरूपभेदु ॥ पन्हादुस

परि
३

राऊाण्पीक॥५१॥विटाळुस्पर्ष॥५३॥हैनभिन्न॥५४॥होदं॥आगा॥विरवुरिस्ला
रि॥दिसीवरीसहीन॥गिवसोदिसो॥५६॥किळप्रभा॥५७॥त्रिपुटित्रिविधा॥
चिरटिभंग॥५८॥मुकुळेपुष्पाकळिका॥५९॥तुरंबोआंगीलेवो॥५९॥सिनानि
भिन्न॥६०॥टेलास्तब्धजाला॥६१॥खेवोसणि॥६२॥समावेशोऐक्यदृष्टी॥रं
भागर्भकेळिचागाभा॥६४॥इतिप्रथमप्रकरणं

श्रीगणेशायनमः॥अथद्वितियप्रकरणं॥उपायसाधन॥अहेवनंतुसौभा
ग्य॥अमूर्तनिराकार॥मूर्तुसाकार॥१॥अडेवअरण्य॥भुंजीतभोगीत॥भवे

श्रम॥चैतन्याचेजिवाचे॥धावेकारुसुखदेनार॥२॥मोडुनि॥नाशुनि॥
कुंजरुहस्ती॥वेगरुजेवन॥३॥अपांगदृष्टी॥आनेवोहटे॥पासीजवळ
कैवल्यमोक्ष॥नकडसिनविचारी॥थोरसानामोटेलाहन॥याढाउप्राप
क॥५॥विकेआधिकपे॥६॥येकवळायेकत्र॥लीलासहज॥७॥सर्वेवेळे॥
उपायाचेसाधनाचे॥धावेउद्योग॥८॥अनवसरेवियोगे॥मोहिरेमोहजा
ळ॥खेवक्षणि॥बहुरुपनानात्व॥९॥काळवखेअंधारे॥फांकेप्रकाशे॥
शिवतलेस्पर्शले॥१०॥सलिलेजळे॥पाखाळ्वेसुद्धहोय॥११॥नित्येसिद्ध॥

परि॰
५

गौरवपुज्यता ॥१२॥ सुसासजड ॥ वासठाव ॥१३॥ तुषारेवृष्टी ॥ परतलेपालट
ले ॥ अविद्येचेविषयाचे ॥ महुरेगोडपण ॥ परिणमेसेवटि ॥ रूपांतरासये ॥१४॥
वेद्यादृश्या ॥ वेदकद्रष्टा ॥ सुयेरिघे ॥ उसिटीउचिष्ट ॥१५॥ सावायेसात्यतेण ॥
उपरुयोग्यता ॥ तृणातविन्तणावारी ॥ उद्दासेउपक्षणे ॥१६॥ उपास्तिरीत
पासनेकरुन ॥ राबतयासेवकास ॥ उपायसाधने ॥ वरिपडलेस्वाधीनजा
ले ॥ अनुज्ञाआज्ञा ॥ दिटिवादृष्टी ॥ निगमवेद ॥ आपुलिये ॥ फळिआत्म
स्वरुपी ॥ हातुप्रतिति ॥ नेघेयतिनहोय ॥१७॥ पुढेदृश्य ॥ अलगेअलिप्त॰


पणे ॥ खोचिभेदि ॥ निवटिनासि ॥ आंगेदृश्यभासे ॥ जयेस्तायेशा ॥ १९ ॥ मु
दलेमुळे ॥ सेलेश्रेष्टपदवि ॥ नाथिलेमिथ्या ॥ सदैवभाग्यवंत ॥ २० ॥ घनव
टेबळकट ॥ कव्हणिकोण्या ॥ २१ ॥ सावेवसंपूर्ण ॥ अवकाशाचिव्यापक
तेचि ॥ हावइच्छा ॥ २२ ॥ कडवसेअसे ॥ २३ ॥ आपुलियेपूर्णपण ॥ २४ ॥ हेनदु
निचेपुष्कळ ॥ नवचेनजाय ॥ २५ ॥ कव्हणिकोणि ॥ २६ ॥ केंकोटे ॥ अनुमा
नाचितर्कांचि ॥ मांदिसमुदाय ॥ येवोस्पर्षकरु ॥ २७ ॥ लिहिलेख ॥ तेणेसि
तेच ॥ चावळोउपदेश ॥ बैसेकरी ॥ २८ ॥ परीप्रकार ॥ प्रमेयस्वरूप ॥ अविष

पत्रि
५

रेभ्रगटहोय॥ मेचुआवड॥ धुरेश्रेष्ट॥ केउनिकोणिकडे॥ सुयेसर्षकरी॥
नाथिलेमिथ्या॥ बुंथीघोगटि॥ ३२॥ डगरुकिर्निघोष॥ ३४॥ मावालीला॥
विखोविषय॥ ३६॥ गुढाग्रहणा॥ ३७॥ बहुवसेबहुत॥ उभउनिरखुनि॥ ३९
साजनेसख्य॥ भत्फसेवक॥ ३९॥ चेयिलियाजागृति॥ नीदनिद्रा॥ ४१॥
थलीवपात्र॥ बरवशोभा॥ ४२॥ उदोउदय॥ ४४॥ नुठीनदिसे॥ ४६॥ वेखा
सेवाकडे॥ ४७॥ झोलुपहर॥ कडुपदर॥ ४८॥ निर्वाळलिउजळलि॥ पुलि
काज्योति॥ ५१॥ दोहोअस्ति॥ कापुरमैळरे॥ भेटी॥ ५२॥ कांतेस्त्रिपुरुष॥

॥५३॥ भारवाप्रकार ॥ उपरवाआरोप ॥ ५४ ॥ पवाडविस्तार ॥ ५५ ॥ सोयरेपणगुरु
शिष्यपण ॥ विलक्षणविरुद्ध ॥ त्रिपरीत ॥ ५६ ॥ ठायेराहे ॥ ५७ ॥ आधारुढाव
दुर्भरुसाढवण ॥ विरुद्धविपरीत ॥ ५८ ॥ भेदभेदबुद्धि ॥ ६० ॥ लेणेअळंकार ॥ उ
खिढवाळि ॥ ६५ ॥ निरंजनिवनातचेताजागता ॥ चेषविताजागविता ॥ ६६ ॥
चेजागाहोय ॥ चेववीजागवि ॥ ६७ ॥ लीलासहज ॥ ६८ ॥ उमसोश्वास ॥ वि
सकुसोफुटो ॥ ६९ ॥ बरवशोभा ॥ राणिवराज्य ॥ ७० ॥ उन्नतिउत्कर्ष ॥ आणि
कावारिसूर्य ॥ ७२ ॥ वोपसरवोपनि ॥ पुडिनिरवळ ॥ केवळचक्रवर्त्तिराजा

॥७३॥ सुनिघालुनि ॥७४॥ दतिसुगंध ॥७५॥ हनजरी ॥७७॥ भरवसेनि ॥ नि
श्चये ॥ गोसावि ॥७८॥ स्वयंभस्वत्तसिद्ध ॥७९॥ इतिद्विनियप्रकरणंसमाप्तः



अथत्ततिनयप्रकरणंप्रारंभः ॥३॥ जियाचेवाचेच्या ॥ बोभाटेउपदेशे ॥ आत्म
याचिजीवाचि ॥ ज्ञोपअज्ञान ॥ लोटेपुर्णनिशेष ॥ येने आगणे ॥ नीदनिद्र
॥१॥ येन्हविसहज ॥ उपेगीउपयोगी ॥२॥ किरणजाळप्रकाश ॥ इंधनेकाष्टे ॥५॥

मरोनिजावोनि ॥ ६ ॥ शीनम्रम ॥ ८ ॥ आपणपाआपणास ॥ होहिहोन्ही ॥
दीटिनेत्रि ॥ ९ ॥ जाकळिगोवि ॥ ११ ॥ त्रायवार्ता ॥ वाउगीलटकि ॥ १२ ॥ बागु
लबाउ ॥ १३ ॥ नाहिपणअभाव ॥ जाणज्ञाणज्ञान ॥ १४ ॥ प्रस्तावोप्रसंग ॥ १५ ॥
शिवसूत्रशिवोक्तग्रंथ ॥ १६ ॥ सुजाणेश्रीरूसे ॥ बोलणेगीनेमध्ये ॥ १७ ॥ लोभे
अर्थ ॥ नबोलतानल्मणता ॥ १८ ॥ आत्मज्ञानस्वतः सिद्धज्ञान ॥ बळआश्रय
॥ सवळप्रातःकाळ ॥ नोहेहोय ॥ १९ ॥ वायवृया ॥ दिक्षीनेत्रप्रकाश ॥ आंग ॥
आपणास ॥ २० ॥ गिवसीधुंडि ॥ कीरनिश्चय ॥ २१ ॥ प्रमाअनुभव ॥ सोहंतो

मि २३ भारी अभिमान नेत्रान २४ अंगाचा देहाचा २५ इंधन काष्टे न
रु विरक्त २६ अवडकुगडा २७ परमाणुरज पांडूरशुभ्र २९ बोहका
नाला आथीआहे दुसरेअज्ञान ३१ भारनिवैखरी निस्तरलियापाव
ल्या निमाल्या ३२ इतितृतियप्रकरणंसमाप्तः ३

अथचतुर्थप्रकरणप्रारंभः ४ मारेनासे बाबरेवर्दे साधुनित्यागुनि १
निगालाप्रासजाला त्यागिला २ सुरियासुरीन खोचेटोचे सूरीसुरीस

॥३॥ ढाउनिराहुनि॥ कोपटखोपड॥ साधिज्ञाळि॥ सगटसहित॥ चोरटचो
र॥ मोटेगाढोडे॥ ४॥ पोनासकापुर॥ ५॥ टेकाआश्रय॥ अधिकाश्रेष्ठ॥ फा
केवाढे॥ उफरकानाश॥ पंडेहोय॥ ६॥ दृशेवान॥ निमाल्यासरल्या॥ उवा
याउत्कर्ष॥ ७॥ कुचभरनरुणीचेस्तन॥ फाकनेउगवने॥ जाइउळजाइ
चेपुष्प॥ ८॥ निमनमोडने॥ उदैजनेझळकने॥ ९॥ पिउनिनाशुनि॥ निद्रा
ननाश॥ १०॥ भरितेपुर॥ अरोनेअलिकडे॥ ११॥ नमअंधःकार॥ १२॥ उवा
यउत्कर्ष॥ १४॥ सनराविजीवनरुव्हा॥ १५॥ नसिंपेनस्पर्शे॥ जाउपेबाळके॥

१ पत्र
८

॥१६॥ रुळेमवळे ॥ निर्वाळले ॥ १७ ॥ रिगेप्रवेशे ॥ बोळघेचढे ॥ १९ ॥ विवळेदिसे ॥
घेपतुग्रात्य ॥ २१ ॥ जाणज्ञान ॥ २२ ॥ सोयवळख ॥ २३ ॥ व्यवस्थास्थिति ॥ प्रथा
प्रसिद्धि ॥ २६ ॥ अपवादुआरोपु ॥ २७ ॥ निर्दैजतापुरुष ॥ २९ ॥ विरवोविषय ॥ ३२ ॥
निरंजनिवनि ॥ ३३ ॥ फुडेप्रगट ॥ ३५ ॥ काळपुरुष ॥ काळवरवाअंधःकार ॥
नचोजवेनदिसे ॥ ३६ ॥ मानुमसनेउल्लेख ॥ ३७ ॥ निष्कर्षनिश्चय ॥ आपुला
आत्मस्वरुपा ॥ पुढिलाआणिकास ॥ ३८ ॥ निर्मळउद ॥ हारतलयाजिराल्या ॥
पोखरणिपुष्करणिसरोवर ॥ ३९ ॥ भागुआंगी ॥ ४० ॥ निमालयागेल्या ॥ न

त॥ द्वंद्वाचे॥ असतसतजडअजड॥ दुखसुख॥ त्वंचकलालुच॥ कंचु
कप्रावरण॥ आर्याआहे ३३ आनौनेमध्ये नी गणेप्रवेश॥ सुखिये॰
सुखहोणे ३४ प्रकृतिडंकुडाहक॥ अनुकेवाजे॥ प्रकृतिडंकुघुमारे॥
अवतरेआंगीभरे ३५ उजिरियायुक्ति॥ नलविताघाणानगाळिता॥
मिठासुगोडि॥ ३९ नसज्जिनासिद्धनकरिता॥ अबोलणास्तब्ध॥ जा
णाज्ञाता॥ ४० सारसुगंध पडेलागे॥ सुवोदेन॥ ४१ रससोयपाक॥ ४२॥
अंकुरसंकल्प॥ मकरध्वजमदन॥ हनजरी॥ ४६ विजोषपात्र॥ सष्टीसमु॰

द्दाय॥ नेघेसुदेनये॥४७॥ अनळअग्नि॥४८॥ वर्मनिबुझनि॥४९॥ सुडासु
डका॥५०॥ द्दोहोद्दोनि॥५१॥ शिहाणेचतुर॥५२॥ प्रेमेयवस्तु॥५३॥ अनुपप
निअभाव॥ उपपत्तियुक्ती॥ पातिपाळी॥५४॥ वायवृथा॥५५॥ निर्द्धारनि॰
श्चय॥ सुभटुसेवक॥ योद्धावलारा हिला॥५७॥ चडळजाड॥ निफळनिर्म
ळ॥५८॥ उबाउष्मा॥५९॥ आनुभाव्य॥ भोगसाधन॥ अनुभाविकभोक्ता॥
अनुभूनिकभोग्य॥६०॥ हाटावोवरीयथपर्यंत॥ विरहहारी॥ पंक्ति॥ बाइ
ल॥ माडिला॥६१॥ मिठिमौन॥ सळस्फुर्ति॥ वावरिजेलबोलवेल॥ वोठीवच

णकोणअनोळख ॥४१॥ सकुंभताकुंभसहित ॥ आपजेयोजे ॥ नसीव
तिचांगअचळ ॥ चोरवमुद्ध ॥४२॥ इतिचतुर्थप्रकरणसमाप्तः ॥४॥ छ ॥



अथपंचमप्रकरणप्रारंभः ॥५॥ निहिउणेयेकरूप ॥ लेखस्वरूप ॥१॥ इा
ववोल ॥२॥ दनिसुगंध ॥ मार्दवमृदु ॥३॥ मौवाळमृदु ॥ उजाळशुभ्र ॥४॥
भेदेत्रिविधपणे ॥६॥ उल्हासस्वरूप ॥ मिळसुगोडि ॥ लेखप्रमाण ॥ अ

परि·
१

सतमिथ्या ॥ व्यावृत्तिबाध ॥ समाप्तीनाशी ॥ १० ॥ निगदिलेकथिले ॥ उ
पदेशिले ॥ निश्वासेवेद ॥ ११ ॥ प्रतियोगीप्रतिकुच्छ ॥ लोटितानिवारि
ता ॥ न्यायसिद्धी ॥ १२ ॥ व्यावृत्तिबाध ॥ १३ ॥ गिर्वसेविषये ॥ १४ ॥ तेजेव
स्त ॥ केआथिकोठेआहे ॥ १५ ॥ विखोविषय ॥ प्रेमअर्थ ॥ १६ ॥ परिछिदष्ट
थक ॥ १७ ॥ शेषउर्वरीत ॥ १८ ॥ ऐसेनिपुर्वोक्त ॥ स्वसंवादेअनुभवे ॥ भेट
तिलीनहोति ॥ १९ ॥ हारतले ॥ २० ॥ चोहटाउच्चरस्थान ॥ वेदांतशास्त्र ॥ २४ ॥
नमववेनमोजवे ॥ मवित्तआपण ॥ २५ ॥ अचिदाजड ॥ २० ॥ प्रबोधजाग

नेकैंकाठे॥६२॥पाटीस्थळि॥रंधनस्वयंपाक॥६३॥सेजेशोभे॥सुइज्जनिघा
लिति॥६४॥व्याजमिस॥काजकार्य॥भोजसुख॥६५॥पुढिलाआणिका॥
पैंठाई॥आठौनिस्मरणाकरुनि॥६६॥परौनेवेगळे॥चागावेचागलेपण
स्मारकसुचक॥६७॥इतिपंचमप्रकरणं॥५॥

अथशाष्टमप्रकरणंप्रारंभः॥६॥विस्तुपदार्थ॥सधरथोर॥अमुर्तनिराका
र॥विषदुस्वछ॥१॥अव्यक्तमाया॥अंशविम्ब॥उद्योनकारुप्रकाशक॥२॥

तेवस्तु ॥ ७ ॥ कळिकटाकळह ॥ शिष्टुशिक्षक ॥ नायिलेलटीके ॥ तीनकव
डेपैका ॥ ६ ॥ कुमारुबाळक ॥ भरीप्रवेश ॥ पंचाक्षरीमंत्रज्ञ ॥ ७ ॥ झेहोद्वेष ॥ बो
लाशास्त्र ॥ ९ ॥ विखोविषय ॥ १४ ॥ केउतेकोठे ॥ १५ ॥ नीद्दनिद्रा ॥ १६ ॥ दिवोदिव
स ॥ १७ ॥ स्मारकेसुचके ॥ १८ ॥ किरानिश्चय ॥ १९ ॥ खेवक्षपणी ॥ २० ॥ उदेउदया ॥ २१ ॥
चेनेजागणे ॥ २२ ॥ निरुनिरखरी ॥ २३ ॥ जाउपेबाळक ॥ २४ ॥ शीतहोरी ॥ धनुव
यिधनुष्यधर्ता ॥ तृष्णिकामृगजळ ॥ अविद्येसिविषयि ॥ २६ ॥ वळधीप्रवे ॥
ष ॥ आथिआहे ॥ आगीअग्नि ॥ गंधर्वनगरेगंगनिविचित्रभास ॥ कीर ॥

निश्चय ॥ २८ ॥ सोसुप्रयत्न ॥ २९ ॥ पाडेसमान ॥ ३० ॥ सतकेप्रत्यक्ष ॥ ३१ ॥ वोडं
बरधातुर्वाद्द ॥ परियेळवाढिलिअन्नपात्रे ॥ आरोगीजतुजेवनजेचो ॥ ३३ ॥
नुमंडनदिसे ॥ वोल्हासुआईना ॥ ३४ ॥ आगरतच्छीसेतमळे ॥ ३५ ॥ वोरबो
रेप्रयत्न ॥ ३६ ॥ टवाळेमिथ्या ॥ ३७ ॥ अनिर्वाच्यबोलवेना ॥ देवांगणाशप
थ ॥ घटाभावेघटनसना ॥ अंकीतचिन्हीत ॥ ४० ॥ प्रमाप्रमाण ॥ मायावि-
मोहिणि ॥ अभाविनाहिपणा ॥ ४२ ॥ हानुवसिहातुघालि ॥ ४३ ॥ साबळा
पाहार ॥ हालेनिमारण ॥ थोटावोभ्रमीहोय ॥ ४४ ॥ पानीप्राशणि ॥ ४५ ॥ त

वक्राआवेशो ॥ नर्काशब्द ॥ ४६ ॥ वाइलधरील ॥ ४७ ॥ गुढघास्त्रेटोगल्यान
॥ ४८ ॥ मोद्वळापूनका ॥ ४९ ॥ परतुमागेपरतन ॥ नाथुतंतु ॥ ५० ॥ खोळेपद्द
॥ ५१ ॥ मसीशाही ॥ ५२ ॥ सुधाकरचंद्र ॥ ५४ ॥ खवनेआकाश ॥ पद्दासांडि ५९
उन्मेखस्फुर्ति ॥ ६० ॥ रससोयस्वाद ॥ ६२ ॥ चेतानेचैतन्याने ॥ ६५ ॥ साचाको
राकागद ॥ प्रतिशेधकेनिशेधवचने ॥ ६८ ॥ निमाल्लेप्रेन ॥ ७० ॥ थ्यिनासि
द्ध ॥ ७१ ॥ मोहरासन्मुख ॥ संहारनाश ॥ ७३ ॥ सवियासहज ॥ ७५ ॥ निर्गप्र
वेशकरी ॥ ७७ ॥ आपणपयाआपणास ॥ ८० ॥ राकिलाग ॥ ८१ ॥ सुयघा

लि ॥ ९२ ॥ सुरियासुरी ॥ उगाणेझाडा ॥ ९० ॥ उमसुविसावा ॥ ९४ ॥ द्विविद्वि
टि ॥ द्विवोद्विवस ॥ ९५ ॥ परिवपक्षि ॥ ९७ ॥ भागुविभागास ॥ अर्थताखरेप
णे ॥ ९८ ॥ सपडपेभास ॥ लेपेचित्र ॥ १०० ॥ निमालानाश ॥ दुर्दिनुव्यर्थ ॥ १०२ ॥
इतिशब्दषष्ठमप्रकरणसमाप्तः ॥ ६ ॥

अथसप्तमप्रकरणप्रारंभः ॥ ७ ॥ क्षोभउत्कर्ष ॥ द्हेडेलपे ॥ १ ॥ सूनिघालु
नि ॥ वरिपणे ॥ २ ॥ गरिमाथोरीव ॥ ३ ॥ कोल्हेरिखांबसूत्र ॥ धारकियुद्धि ॥

परि०
१३

वोडंबरीबाजिगिरी ॥ ४ ॥ खोचिलेप्रवेशले ॥ ५ ॥ प्रस्तावोप्रसंग ॥ धांडोळा ॥
शोध ॥ ७ ॥ जीनेवैरा ॥ ८ ॥ नेणेअज्ञाने ॥ आश्रोआश्रय ॥ १० ॥ दुजेवेगळे ॥ ११ ॥
प्रमाणअज्ञान ॥ १२ ॥ खेवक्षणि ॥ १३ ॥ लेखेगणना ॥ १४ ॥ जाणताज्ञाता ॥ १५ ॥
नेचिकोणकाहिनाहि ॥ १६ ॥ आनेहोय ॥ १७ ॥ इंधनकाष्ट ॥ वाउगीवृथा ॥ २० ॥
पडसायिअंधःकार ॥ २१ ॥ वोजावोनेदिनमोडि ॥ २४ ॥ दोहोदोन्ही ॥ २५ ॥ दि
वोदिवस ॥ २८ ॥ जिणेजिवंत ॥ २९ ॥ बाधेमिथ्या ॥ विरुध्येविपरीत ॥ ३० ॥ पैज
शपथ ॥ निभ्रांतनिश्चय ॥ ३१ ॥ आगीअग्नि ॥ ३२ ॥ खेवोक्षणि ॥ ३३ ॥ जिव्हा

ळिजिवंन॥३६॥वायसेवृया॥३७॥हिहादिवसा॥मदुरेपरने॥३९॥कार्यानु
मेयकारण॥प्रत्यक्षकार्य॥४१॥करणिकार्य॥४२॥वेल्हाळसुंदर॥आरोप
मासे॥जाडपेबाळककार्य॥४४॥निमिरनरंग॥प्रमानाजीव॥प्रेम्येयविष
य॥प्रमाणाइंद्रिये॥४६॥हालयाप्रहार॥मासामीन॥५२॥प्रस्ताविआट
व॥उरखिढवाळि॥५४॥प्रत्यक्षकार्य॥आनुमानकारण॥भाजनपात्र
॥५५॥बिहेभिये॥५६॥निद्देजउनिजउ॥५७॥अवस्थानअसने॥५९॥ब
र वशोभा॥हावअहंकार॥६०॥रूखवृक्ष॥६१॥पवाडुउद्योग॥अवघड

लानाशाला॥चोळारवापद्दर॥६९॥टवाळमिथ्या॥चोरवडानिर्मळ॥
पवाडाप्रसिद्धी॥७३॥पितिप्राप्त॥७५॥उजेरिप्रागल्य॥७७॥माखेमु॰
खासये॥निरुतिनिश्चयकर्ता॥हनजरी॥अनसायीआसने॥७९॥बा
गुआश्रय॥८०॥विषणभृंग॥८१॥गगनौलारवपुष्प॥घापतिघालिज्ञ
ति॥८२॥निरुत्तिनिश्चयास॥८४॥तुमसोन उमजे॥८५॥पघळीपसरी॥
फुडेप्रगट॥८७॥अनुमानतर्क॥८९॥तिमीरत्नगर॥९०॥चोखेशुद्ध॥
फाकेभासे॥दिवोदिवसु॥त्नणिपेत्नणावा॥९५॥चोखाळशुद्ध॥रावि

लेरंगले ॥ त्मणिजनत्मणावे ॥ ९६ ॥ काजकार्य ॥ वाहनिप्रवाहि ॥ ९७ ॥
अभाअवस ॥ ९८ ॥ वोरसोनिपान्हायेवोनि ॥ दुभेप्रसवे ॥ ९९ ॥ जाणन
याचाज्ञात्याचा ॥ १०० ॥ देवागणेशपथ ॥ २ ॥ ऐसेयाप्रकारिचे ॥ कीर।
निश्चय ॥ हारत्नलेहारपले ॥ ४ ॥ मिथ्यावादाचिजगाचि ॥ कुटिआरो
प ॥ विशेषास्छुळभासा ॥ ५ ॥ निमाल्यानिवांनजाल्या ॥ सोयिप्रवाहि ६
ढायेराहे ॥ ८ ॥ पाटाव्हिअंगिकारी ॥ ९ ॥ वोध्यजाणायासयोग्य ॥ १० ॥ ब
रडिभुमि ॥ ११ ॥ चिरवोविषय ॥ १३ ॥ सूनिकरूनी ॥ वासिपेचवके ॥ १४ ॥ ना

डिळवाधी॥साधिमांडि॥कडेमध्ये॥सवडेसेंडा॥निर्णोविचार॥सानाअस
ना॥१६॥व्यवस्थानिश्चय॥१७॥केउतनेकैसे॥संच्यारुप्रवेष॥बीकशोभा॥
राणिवराज्य॥१९॥उमसोजाणे॥आनशापथ॥१२१॥साकडेसंकट॥रिद्धि
संमृद्धि॥चित्लेषुस्वरूप॥शीळास्फटीक॥वेध्यज्ञय॥१२५॥वेटविवेघवि॥२६॥
सुसासउल्लेख॥कासप्रतिज्ञा॥२९॥परीप्रकार॥३०॥मिठिलोप॥३१॥मो
टकेसुंदर॥नोखेनोषे॥३२॥घटघडे॥वांटविभाग॥३३॥पहुडेनिज़े॥वारु
अश्व॥पाडउपमे॥३४॥हेलावेक्रिडा॥३५॥आहाळागडद॥३६॥गिंवसुत्र

काश॥३८॥भाषशाहू॥३९॥येकोनरावायेकआगळा॥१४०॥वोजाविना
वनि॥नाथुसून॥४१॥दाखवेआडवळ॥४३॥बांधाभेला॥४४॥भाखाभाष
पा॥४६॥दुबधिदुरंगी॥वानवर्णे॥४७॥फांकाविस्तार॥४९॥हावआवेशा॥५०॥
रिगौनिप्रवेशुनि॥५१॥नुदेजलियाउदयनकरिता॥५२॥कुंटेकिर्नि॥
वावटेवाढे॥५४॥निद्रासमाधिन॥५५॥विखोविषय॥५६॥स्पंदगति दि
सीप्रकाश॥नपनसूर्य॥५८॥विपायेकदाचित्॥१६०॥नमखेनउजळे॥
॥६१॥डोळयामध्ये॥नारादृश्यरूप॥विस्मोआश्चिर्य॥६४॥आरोपेआळ॥६५॥

पति·
१६

आपज्ञविघालि ॥ ६६ ॥ सौरभ्यसुंगंध ॥ ६७ ॥ उभळाज्योति ॥ चिद्रूपजगद्रू
प ॥ ७० ॥ अनुप्रवेषऐक्य ॥ ७४ ॥ खेवआलिंगण ॥ ७६ ॥ पोनासुकापुर ॥ ७७ ॥
रुसनाआवरिता ॥ ८० ॥ उन्मिळनाउघडिना ॥ ८४ ॥ लेखदर्शणा ॥ योगऐ
क्य ॥ वाज्ञेघडे ॥ ८५ ॥ जुमसेनउठे ॥ ८६ ॥ ठाउनिरुछविडुनि ॥ पेढिप्रवेश ॥
सुनापाहाना ॥ ८८ ॥ दिवोदिवस ॥ प्रस्तावाआरंभ ॥ ८९ ॥ घापनाघेना ॥ शिव
तलास्पर्षला ॥ १९० ॥ उद्दोउदय ॥ घेपेघे ॥ ९५ ॥ ठायेराहे ॥ बाधूनिबाधरेउ
नि ॥ २२० ॥ सोयस्छिनि ॥ १ ॥ कीरनिश्चय ॥ ४ ॥ वायानिव्हृया ॥ ५ ॥ सुकासनि

पालखि॥नेसनिनैसी॥७॥सतुकेप्रत्यक्ष॥८॥मृगतृष्णामृगजळ॥२१०॥या
जेमिषे॥वांझेच्यर्य॥११॥रायराजापैकिठायि॥१४॥पैठाप्रवेष॥दिठादे
खिलाप्रगट॥१६॥पुनरुक्तद्विवार॥१७॥दोहोदोहिस॥वावोमिथ्या॥२२॥
निदानिद्रा॥२६॥शिखाज्वाळालेखागणना॥३२॥विन्यासेप्रकारे॥३५॥
भांगारसुवर्ण॥३६॥अनुमेयग्रात्य॥३८॥वाजटावाद्का॥काष्ठास्वरूप
॥४४॥फरकेस्फुरे॥४६॥घातलेबुडाले॥४७॥म्हतिनाहृ॥द्दतिसुगंध॥तृप्तिस
माधान॥वोगरिलिवाहडलि॥४८॥परवडिलाभक्षिला॥सवासमागमे॥फा

केविस्तारे ॥ मुके भुले ॥ आधिआले ॥ ५७ ॥ येकवडुयेक ॥ ५९ ॥ भूमिकेनेत्र ॥ २६० ॥
सळाहाणि ॥ ६१ ॥ नोहेनघडे ॥ ६२ ॥ नढाफुढण ॥ ६३ ॥ ठेवाआकार ॥ ६४ ॥ कांटा
ळेसमान ॥ ६६ ॥ वोगरुअन्न ॥ वारवबाड ॥ ६७ ॥ राणिवराज्य ॥ ६८ ॥ त्नणीपे
त्नणाव ॥ न्यायविवेक ॥ वायवृथा ॥ उपसाहोसहन ॥ ६९ ॥ हनजर ॥ २७० ॥ वा
नपृथक् ॥ ७२ ॥ निकृष्टअधम ॥ माडुसेसंडुख ॥ ७६ ॥ आनेआंनडि ॥ ७७ ॥ आ
खरिअक्षरी ॥ अनृतमिथ्या ॥ ७९ ॥ बहुयेबहुत ॥ २८० ॥ निर्वचनाविचारि
ना ॥ ज्ञावळेलपाले ॥ ८१ ॥ ठेलेसांगे ॥ ८३ ॥ आनेहोय ॥ ८५ ॥ सांगडासारिखा ॥

पडिपाडासमान ॥ १० ॥ यस्यज्याच्या ॥ वायसावृथा ॥ ११ ॥ सद्भावाआस्ति
त्व ॥ १३ ॥ विसुराभ्रांति ॥ १४ ॥ खोंळेपद्दरात ॥ १५ ॥ इतिसप्तमप्रकरणंसमा
प्त ॥ ७ ॥

अथअष्टमप्रकरणप्रारंभः ॥ १ ॥ उवायेउत्कर्षे ॥ ३ ॥ नसंदोनसादवो ॥
घसवदोझिजो ॥ ४ ॥ बिखोविषय ॥ पारखोलोपो ॥ ६ ॥ विपायेकद्दाचिनके
उनेकोणीकडे ॥ मायामाता ॥ होउबाळक ॥ ९ ॥ निमिषलावन ॥ उन्मेषउ

परि॰
१८


घडन॥१२॥ विष्णुविलिबुडालि॥१३॥ द्वंपत्स्येस्त्रिपुरुषे॥१४॥ पाहेव्यापे॥१५॥
सुजेदिसे॥१६॥ वांझोब्लेचृथा॥ अहनिरात्रदिवस॥१८॥ इतिअष्टमप्रकर
णसमाप्तः॥८॥

अथनवमप्रकरणप्रारंभः॥९॥ अमोदसुगंध॥ सुनासनासीक॥ श्रुति
शष्द॥ श्रवणकान॥१॥ चांपेपुष्प॥ शेजारशय्या॥ चुतांकुरआम्रपल्लव॥ आं
गशरीर॥ आनलेजाले॥२॥ दिठिवियाचादृष्टीचा॥ खागडा॥ नागरुसुं

दर ॥ ठेवाआकार ॥ कोरिवानकशी ॥ ६ ॥ अफुटनिघोटा ॥ सेवनेशेवत्तिच
पुष्प ॥ उपलविजेगणिजे ॥ वाधाविमूळ ॥ ९ ॥ सूनिघालुनि ॥ १० ॥ त्रिलिंगि ॥
त्रिविध ॥ १२ ॥ घापेघालि ॥ १३ ॥ परौतेवेगळे ॥ १५ ॥ उज्जुसमोर ॥ १६ ॥ वरिखनेत्र
ष्टी ॥ करणेइद्रिये ॥ १९ ॥ वावडेबोले ॥ २० ॥ बहुडेराहे ॥ अस्फूतिअप्रवृत्ति ॥ बा
धावनेमूळधाडने ॥ प्रत्यंज्ञुखस्वरुपोन्मुख ॥ २८ ॥ वोळगेवसवि ॥ २९ ॥ कै
वल्यमोक्ष ॥ चढावाअधीकता ॥ भृत्यभक्त ॥ भज्यदेव ॥ कालावाऐक्य ॥ ३० ॥
ठाकिजेराहिजे ॥ ३४ ॥ रिद्धिसमृद्धि ॥ घापेघालि ॥ ३५ ॥ अकर्मुअक्रिय ॥ ३६ ॥

परि॰
१९

द्वैविभक्त ॥ केंकोठे ॥ अन्वयसंबध ॥ ३८ ॥ कामिविजेकल्पिजे ॥ ३९ ॥ संसारा
विस्तारा ॥ ४० ॥ रुखवृक्ष ॥ ४३ ॥ अखताअक्षता ॥ ४५ ॥ दिप्तिप्रकाश ॥ लुगडिव
स्त्र ॥ ४६ ॥ चंद्रिकाचांदिने ॥ ४७ ॥ अडोळ्ळिलियादृश्य ॥ ५५ ॥ रळ्ळिविनोद ॥ प्रबु
द्धप्रौढ ॥ ५८ ॥ उपास्तिभक्ति ॥ अकृत्रिमसहजा ॥ ६१ ॥ वाच्यबोलणे ॥ ६४ ॥ चां
गुणथोर ॥ लघुशिष्य ॥ पागुप्राप्ति ॥ वांटेविभाग ॥ समूएक्य ॥ ७० ॥ संसारावि
स्तारा ॥ ७१ ॥ इतिनवमप्रकरणसमाप्तः ॥ ९ ॥ छ छ छ छ छ छ छ



अथदशमप्रकरणप्रारंभः ॥१०॥ सुखियासुखकेले ॥१॥ सुनिकळा ॥२॥
असंवर्यअपार ॥ देविकिस्वामिचे ॥ स्वानंतनर्यस्वाधीनता ॥६॥ विन्यासविस्ता
र ॥ ठाउनिराहुनी ॥ विपाये ॥ कदाचित् ॥ हनजरी ॥९॥ संवितज्ञान ॥ रहस्य
गुज ॥१०॥ प्रस्तावोआरंभ ॥ सिद्धानुवादुस्वनः सिद्ध ॥ लोहोलाभो ॥१२॥ वे
ठलोआरुढलो ॥१५॥ वोपेशोभे ॥१६॥ मगरीमासोळि ॥१७॥ हेचिअनुभवा
न ॥१९॥ लाळाआवड ॥२०॥ साचायिलेआळिंगिले ॥२२॥ परगुणेपाहंचा
र ॥ वोगरिलेजेवनकेले ॥ विधुरवियोगअप्राप्त ॥२५॥ अवगाहनाभेटिस ॥

तिमिरेंअंधःकार ॥२६॥ कसवटिस्पर्शे ॥ वानियाचिहिनान्चि ॥ पन्हरेंउत्त
म ॥ पाटिस्थानि ॥ २७ ॥ अखराअक्षरा ॥ गाभाराअर्यास ॥ २८ ॥ आंगोळि ॥
बोटनिर्दैष ॥ सरोभरीसाम्यत्ता ॥ २९ ॥ सन्तूसंतोष ॥ ३० ॥ इतिद्दमप्रकरणंस
माप्तः ॥ १० ॥ छ ॥ श्री ॥ छ ॥ श्री ॥ छ ॥ श्रीकृष्णंनौमि ॥ विश्वाचेनिसने ॥ सर्वाधि
ष्टानरूपे ॥ श्रीगोविंद ॥ ॥ अविद्यामायाविबोलिजे ॥ स्मणीजेलटिकेचियं
णेरूढविजे ॥ नेसत्यासारिखेंदेखिजे ॥ लपउनिमायाविपणे ॥ १ ॥ मा
याविस्मणिजेटवाळ ॥ साचासारिखेंअकुमाळ ॥ हाविपरिनेसक

ळ ॥ मिथ्याचिअवघे ॥ २ ॥ इतिअनुभवामृतपरिभाषाज्ञानेश्वरोक्ति

समाप्तः ॥ श्रीसद्गुरुनाथोप्रीयतां ॥

M-2701 E

॥ ।इतिश्रीअनुभवामृतपरिभाषासमाप्तः ॥

[OrderDescription]
,CREATED=12.08.20 11:34
,TRANSFERRED=2020/08/12 at 11:45:06
,PAGES=65
,TYPE=STD
,NAME=S0003481
,Book Name=M-2701-PANCHRATAN
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF

FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF

FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF

FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,